# 5. अत्युत्कटैः पापपुण्यैः इहैव फलमश्नुते

- नारायणपण्डितः

**कविपरिचयः :-**

संस्कृतकथासाहित्ये नीतिशास्त्रग्रन्थाः बहवः वर्तन्ते। तादृशेषु कथा ग्रन्थेषु श्री नारायण पण्डितेन विरचितः हितोपदेशः सुप्रसिद्धः। अयं नारायणपण्डितः बेंगाल् पालकस्य धवलचन्द्रस्य आस्थानकविः । अयं क्रिस्तोरनन्तरं चतुर्दश शताब्द पूर्वीकः इति हस्तलिखित ग्रन्थाधारतया पण्डितैः निर्णीतः। अयम् हितोपदेशः भारतदेश भाषासु अनेकविदेश भाषासु च अनूदितः। हितोपदेशस्तु मित्रलाभः मित्रभेदः विग्रहः सन्धिः इति चतुर्धा विभक्तः।

पञ्चतन्त्रस्य रूपान्तरग्रन्थः एव हितोपदेशः। "पञ्चतन्त्रात् तथान्यस्मात् ग्रन्थादाकृष्य लिख्यते" - इति कविनैव प्रोक्तम्। तथापि बहुषु प्रदेशेषु बहुविध स्वतन्त्रतापि दृश्यते। पञ्चतन्त्र परिच्छेद नामातिक्रमश्च अत्र परिणतः। कामन्दकीयनीति शास्त्र श्लोकाः अपि अत्र दृश्यन्ते। पञ्चतन्त्रे पञ्चभागाः। अत्र केवलं चत्वारः भागाः। सुहृद्भेदः मित्रभेदत्वेन, विग्रहः काकोलूकीयलब्धप्रणाश रूपान्तरेण वर्तते। हितोपदेशे सन्धिः स्वतन्त्रः। मित्रलाभस्तु उभयत्र समानम्।

पञ्चतन्त्रादपि अत्र कथाः अधिकाः उपदेशात्मकतया दृश्यन्ते। हितोपदेशः इति अस्य ग्रन्थस्य नाम सार्थकमेव। उपदेशबोधस्यैव प्रामुख्येऽपि अत्र कथा कथनलोपो नास्ति। हितोपदेशभाषा पञ्चतन्त्रादपि सरला। विद्यार्थिनां पठनयोग्यत्वेन उपदेशात्मकतया सन्दर्भानुगुणम् अनेकाः लोकोक्तयः मनोरञ्जकतया अत्र निबद्धाः।

**पाठ्यपरिचयः**

अस्मिन् पाठ्यभागे हितोपदेशे मित्रलाभात् श्रुगालमृगकाक कथा, गृध्रमार्जारकथा च पाठ्यत्वेन स्वीकृते। अस्यां कथायां अस्मिन् लोके यः कोऽपि अतीव पुण्यकृत् पापकृत् वा त्रिभिः वर्षैः त्रिभिः मासैः, त्रिभि पक्षैः त्रिभिः दिनैः तत्तत्फलम् अनुभवति इति नीतिः उपदिश्यते।

**पाठ्यांशः**

अस्ति मगधदेशे चंपकवती नामारण्यानी। तस्यां चिरात् महता स्नेहेन मृगकाकौ निवसतः। स च मृगः स्वेच्छया भ्राम्यन् हृष्टपुष्टाङ्गः केनचिच्छृगालेन अवलोकितः । तं दृष्ट्वा श्रुगाल, अचिंतयत् - "आः कथं एतन्मांसं सुललितं भक्षयामि। भवतु, विश्वासं तावदुत्पादयामि" इत्यालोच्य उपसृत्य अब्रवीत् - "मित्र!

Scanned with OKEN Scanner

गृध्रोऽवदत् - मार्जारो हि मांसरुचिः। पक्षिशावकाश्चात्र निवसन्ति। तेनाहमेवं ब्रवीमि। तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति। ब्रूते च - "मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणं अध्यवसितम्। परस्परं विवदमानानामपि धर्मशास्त्राणां अहिंसा परमो धर्मः" इत्यत्रैकमत्यम्। यतः सुहृद्धर्मः एकः एव निधनेऽपि अनुयाति। सर्वमन्यत्तु नाशं गच्छति।" शृणु पुनः।

**स्वच्छन्दवनजातेन शाकेनाऽपि प्रपूर्यते ।**
**अस्य दग्धोदरस्याऽर्थे कः कुर्यात् पातकं महत् ॥५।**

एवं विश्वास्य स मार्जारः तरुकोटरे स्थितः।

ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरं आनीय प्रत्यहं खादति। येषां अपत्यानि खादितानि तैः शोकार्तैर्विलपद्भिः इतस्ततो जिज्ञासा समारब्धा। तत्परिज्ञाय मार्जारः कोटरान्निस्सृत्य बहिः पलायितः।

पश्चात् पक्षिभिः इतस्ततो निरूपयद्भिः तत्र तरुकोटरे शावकास्थीनि प्राप्तानि । अनन्तरं ते ऊचुः - "अनेनैव जरद्गवेन अस्माकं शावकाः खादिताः" इति सर्वैः पक्षिभिः निश्चित्य गृध्रो व्यापादितः। अतः अहं ब्रवीमि - "अज्ञातकुलशीलस्य वासो न देयः ।" तदाकर्ण्य जम्बुकः सकोपमाह - मृगस्य प्रथमदर्शनदिने



भवानपि अज्ञातकुलशीलः एव। तत्कथं भवता सह एतस्य स्नेहानुवृत्तिः उत्तरोत्तरं वर्धते? अयं निजः परो वेति गणना लघुचेतसाम्। "उदारचरितानां तु वसुधैव कुटुम्बकम्।" यथा अयं मृगो मम बन्धुः तथा भवानपि। मृगोऽब्रवीत् - किमनेन उत्तरोत्तरेण। सर्वैः एकत्र विस्रम्भालापैः सुखेन स्थीयताम् - काकेन उक्तम् "एवमस्तु" अथ प्रातः सर्वे यथाभिमतदेशं गताः।

एकदा निभृतं शृगालो ब्रूते - "सखे, अस्मिन् वनैकदेशे सस्यपूर्णक्षेत्रमस्ति। तदहं त्वां नीत्वा दर्शयामि।" तथा कृते सति मृगः प्रत्यहं तत्र गत्वा सस्यं खादति। अथ क्षेत्रपतिना तद् दृष्ट्वा पाशो योजितः। अनन्तरं पुनरागतो मृगः पाशैः बद्धः अचिन्तयत् -

"को मामितः कालपाशादिव व्याधपाशात् त्रातुं मित्रादन्यः समर्थः? तत्रान्तरे जम्बुकः तत्रागत्य उपस्थितः अचिन्तयत् - "फलिता तावदस्माकं कपटप्रबन्धेन मनोरथसिद्धिः । एतस्योत्कृत्यमानस्य मांसासृग् लिप्तानि अस्थीनि मयावश्यं प्राप्तव्यानि। तानि बाहुल्येन भोजनानि भविष्यन्ति।" मृगः तं दृष्ट्वा उल्लासितो ब्रूते - "सखे! छिन्धि तावत् मम बन्धनम्। सत्वरं त्रायस्व माम्।"

जम्बुको मुहुर्मुहुः पाशं विलोक्य अचिन्तयत् - "दृढः तावदयं बन्धः।" ब्रूते च - "सखे, स्नायुनिर्मिता एते पाशाः।

कुशलं ते?" मृगेणोक्तं - "कस्त्वम्" स ब्रूते - "क्षुद्रबुद्धिर्नाम जम्बुकोऽहम् अत्रारण्ये बन्धुहीनो मृतवन्निवसामि। इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि। अधुना तव अनुचरेण मया सर्वथा भवितव्यम्" मृगेणोक्तम् - "एवमस्तु"। ततः पश्चात् अस्तंगते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ। तत्र चंपकवृक्षशाखायां सुबुद्धिर्नाम काकः मृगस्य चिरमित्रं निवसति।

तौ दृष्ट्वा अवदत् - "सखे, चित्राङ्ग"। "कोऽयं द्वितीयः"? मृगः ब्रूते - "जंबुकोऽयम् अस्मत्सख्यमिच्छन्नागतः" काको ब्रूते - "मित्र!, अकस्मादागन्तुना सह मैत्री न युक्ता। यतः एकदा जरद्गव नाम गृध्रः अज्ञातकुलशीलस्य मार्जारस्य वासं दत्वा तद्दोषेण सर्वैः पक्षिभिः व्यापादितः। कथमेतदिति ताभ्यां पृष्टः काकः एवं कथयति।"

## गृध्र मार्जार कथा

अस्ति भागीरथीतीरे गृध्रकूटनाम्निपर्वते महान् पर्कटीवृक्षः। तस्य कोटरे दैवदुर्विपाकात् गलितनखनयनो जरद्गवो नाम गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद् वृक्षवासिनः पक्षिणः स्वाहारात् किंचित् किंचित् उद्धृत्य ददति। तेनासौ जीवति। अथ कदाचिद् दीर्घकर्ण नामा मार्जारः पक्षिशावकान् भक्षितुं तत्रागतः।



ततः तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः। तच्छ्रुत्वा जरद्गवेनोक्तं - कोऽयमायाति ?

दीर्घकर्णो गृध्रमवलोक्य सभयमाह। "हा, हतोऽस्मि। अधुना अस्य सन्निधाने पलायितुमक्षमः। तत् यथा भवितव्यं तद् भवतु। तावत् विश्वासमुत्पाद्य अस्य समीपमुपगच्छामि इत्यालोच्य तं उपसृत्य अब्रवीत् - "आर्य त्वामभिवन्दे।" गृध्रोऽवदत् कस्त्वम् ? "सोऽवदत् - मार्जारोऽहम्। गृध्रो ब्रूते-दूरमपसर नोचेत् हन्तव्येऽसि मया।" मार्जारोऽवदत् - "श्रूयतां तावत् अस्मद्वचनम्। ततो यद्यहं वध्यः तदा हन्तव्यः।

गृध्रों ब्रूते - ब्रूहि किमर्थं आगतोऽसि। "सः अवदत् - अहमत्र गङ्गातीरे नित्यस्नायी ब्रह्मचारी चान्द्रायणव्रतमाचरन् तिष्ठामि। यूयं धर्मज्ञानरता विश्वासभूमयः इति पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति।अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुं इहागतः। भवन्तश्च एतादृशा धर्मज्ञा यन्मामतिथिं हन्तुमुद्यताः। गृहस्थधर्मश्चैषः। गृहमागते अरावपि आतिथ्यं कार्यमुचितम्। यदि वा धनं नास्ति तदा प्रीतिवचसापि अतिथिः पूज्य एव यतः-

**निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः।**
**न हि संहरते ज्योत्स्नां चन्द्रश्चण्डालवेश्मनः ।।४।।**

Scanned with OKEN Scanner

तदद्य भट्टारकवारे कथमेतान् दन्तैः स्पृशामि। मित्र, यदि चित्ते नान्यथा मन्यसे, तदा प्रभाते यत्त्वया वक्तव्यं तत् कर्तव्यम्'' इत्युक्त्वा तत्समीपे आत्मानमाच्छाद्य स्थितः सः। अनन्तरं स काकः प्रदोषकाले मृगमनागतं अवलोक्य इतस्ततः अन्विष्य तथाविधं दृष्ट्वा उवाच - ''सखे किमेतत्।'' मृगेणोक्तम् - ''अवधीरितसुहृद्वाक्यस्य फलमेतत्''।

काको ब्रूते - ''स वञ्चकः क्वास्ते?'' मृगेणोक्तम् - ''मन्मांसार्थी तिष्ठत्यत्रैव''। काको ब्रूते - मित्र उक्तमेव मया पूर्वम्।

**परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।**
**वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ॥६॥**

ततः काको दीर्घं निःश्वस्य अरे, वञ्चक, किं त्वया पापकर्मणा कृतम्। अथवा स्थितिरियं दुर्जनानाम्।

**दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।**
**मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषम् ॥७॥**

अथ प्रभाते क्षेत्रपतिः लगुडहस्तः तं प्रदेशं आगच्छन् काकेन अवलोकितः। तं आलोक्य काकेनोक्तम् - ''सखे मृग, त्वं आत्मानं मृतवत् संदर्श्य वातेन उदरं पूरयित्वा पादान् स्तब्धीकृत्य तिष्ठ। यदाहं शब्दं करोमि तदा त्वं उत्थाय सत्वरं पलायिष्यसि।''



मृगः तथैव काकवचनेन स्थितः । ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृगः आलोकितः। ''आः, स्वयं मृतोऽसि'' इत्युक्त्वा मृगं बन्धनात् मोचयित्वा पाशान् ग्रहीतुं सयत्नो बभूव। ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः। तं उद्दिश्य तेन क्षेत्रपतिना क्षिप्तेन लगुडेन श्रृगालो हतः। तथा चोक्तम्-

**त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः।**
**अत्युत्कटैः पापपुण्यैरिहैव फलमश्नुते॥८॥**

**निबन्ध प्रश्नाः**

१. ''अत्युत्कटैः पापपुण्यैः इहैव फलमश्नुते'' इति पाठ्यांशस्य सारं विशदयत।

२. श्रृगालः कथं लगुडेन मारितः विवृणुत ।

३. काकेनोक्तं गृध्रमार्जार कथां विशदयत।

**लघुप्रश्नाः :-**

१. हितोपदेशस्य कर्ता कः ?

२. चम्पकवती नाम अरण्यानी कुत्र अस्ति ?

३. जरद्गवो नाम गृध्रः कुत्रवसति ?

४. गृध्रमार्जार कथा कस्मै केन प्रोक्ता ?

५. मृगः केन वञ्चितः ?

Scanned with OKEN Scanner

६. केषां वसुधा एव कुटुम्बकम् भवति।

७. दुर्जनस्य हृदि किं अस्ति ?

८. मानवः कतिदिनेषु पाप पुण्यफलं अनुभवति?

## सन्दर्भ वाक्यानि

१. अधुना तवानुचरेण मया सर्वथा भवितव्यम् ।

२. अकस्मादागन्तुनां सह मैत्री न युक्ता।

३. गृहमागते अरावपि आतिथ्यं कार्यमुचितम् ।

४. अहिंसा परमोधर्मः।

५. सुहृद्धर्मः एकः एव निधनेऽपि अनुयाति।

६. अज्ञातकुलशीलस्य वासो न देयः ।

७. उदारचरितानां तु वसुधैव कुटुम्बकम् ।

८. मधुतिष्ठति जिह्वाग्रे हृदि हलाहलं विषम् ।

**सन्धिः :-**

१. प्रविष्टोऽस्मि

२. सुबुद्धिर्नाम

३. अकस्मादागन्तुना

४. अध्यवसितम्

५. सुहृद्धर्मः



**समासः :-**

१. मृगकाकौ - मृगश्च काकश्च - (द्वन्द्वसमासः)

२. हितोपदेशः - हितस्य उपदेशः - (षष्ठीतत्पुरुष समासः)

३. गङ्गातीरम् - गङ्गायाः तीरम् - ( षष्ठीतत्पुरुष समासः)

४. शोकार्ताः - शोकेन आर्ताः (तृतीयतत्पुरुष समासः)

५. तरुकोटरः - तरोः कोटरः - (षष्ठी तत्पुरुष समासः)

६. धर्मज्ञानरताः - धर्मे च ज्ञाने च रताः (सप्तमी तत्पुरुष समासः)

Scanned with OKEN Scanner